Shri Raghunath Temple MSS. Library,
JAMMU

No. १२९५

Title अभिधा रहस्यं

Author मथुरानाथः

Extent १३ Age ×

Subject न्याय वैशेषिकं

त्रिपुरारहस्यम्

१२८५

न्याय अभिधारहस्य सं १९८०

श्री
१

नमो गणेशाय ननु वेदैः साक्षादेव प्रवर्त्तयन्तु किं द्वारेण भवत्तुल्या हारं अप्येतद्वहि किंचित्प्रष्टव्यमिति यदि
चेच्छां विनान प्रवृत्तिः विधित्सानां नरम्यिच्छानुभूयते नरासैव व्यापारेण तु किं मानत्रलिके नज्ञाने न
न यावत्प्रवृत्ति मूलत्वं वेदस्य प्रवृत्तेः कृत्तानजनकत्वेन भवतीति कथं पुनः भिसाशंक्याह महन्निज
नकत्वमिस्यादि जनकत्वं प्रयोजनकत्वेषा क्षाज्जनकं स्येति नपात्वेन गृहीत संकेनाद्रपि प्रवृत्त्याप्यते
रितिभावः नेच्छेति जनयितुं शक्या नत्वितिशेषः क्वचित्तथैव पाठः अप्रमया न तत्र सामर्थ्यं प्रति संगादि
ति अगृहीत संकेतस्यापी च्छापनेरिसर्थः इच्छायां संकेतज्ञानस्य कारणत्वकल्पनं च गुरुतरम प्रामा
णिकं चेति भावः अप्रमतज्ञानामतद्वारत्वेन इच्छाजनने द्वारत्वेन पारिशेष्यात् ज्ञानातिरिक्ता द्वा
रकत्वेसति सद्वारकत्वहत्यातद्वारं इच्छाजनने द्वारं अभिधा संकल्पादीनां समुच्चितानां प्रवर्त्तक
त्वं एकस्यैव मन्तमिति प्रमत्तिरिण करणाय मतभेदं स्पष्टयति तत्राभिधेत्यादिना अभिधा ज्ञानमस्य

राम
१

वर्त्तकत्वेन रवाद्वंकस्य लिङादेः कथं प्रवर्त्तकतेति चेत् कांनिराविकीर्षुणा तस्यालिङ्वाच्यत्वमभिहि
तेप्रवृत्तिहेतुरितिप्रवर्त्तकशब्दस्य कर्त्तव्यापारे तात्पर्यं यथा स्वर्गकामो यजेतेत्यादेः संध्यामुपा
सीतेत्यादिवाक्यान्तक्रियायामिष्टसाधनत्वावबोधकत्वेपि तत्र प्रवर्त्तकत्वमस्तु नेकर्त्तुर्व्यापार
धीनप्रवृत्त्याविष्टसाधनताज्ञानस्य हेतुत्वात्तज्ज्ञानाद्विविधप्रक्रियाजन्यफले प्रवर्त्तमानपुरु
षस्येकंविना राज्ञामात्रप्रवर्त्तयतीतिज्ञानानात् इष्टक्रियायां प्रवृत्तिदर्शनात्तथा दृश्यप्रवृत्तौकर्त्तृ
नरधर्मिकतत्क्रियानुकूलप्रयत्नसुतादृकव्यापारवत्ताज्ञानघटितसामग्र्याः प्रयत्नकृत्योजकत्वाव
धारणात्तत्क्रियाविशेषस्वकृतिसाध्यताधीरूपायामप्रवृत्तिर्विशिष्टकारणविरहादेवतादृश
विधेः तत्क्रियायाः स्वकृतेः साधनताज्ञानविरोधित्वात् इष्टसाधनताबलवदनिष्टसाधनतापि नैतन्म
तेविध्यर्थः निष्फलतया ज्ञाते चैत्यवंदनादौ जिनादिवाक्यात्प्रवृत्तस्य तु रूपोबलवद्वेषेणापत्तिबंधा

२ 2

देवसंधानवेदनादेः कथं तेऽपि न तत्र बलवद्द्वेषः तत्करणे अनिष्टजनकत्वाभिसंधेः एवं राजाज्ञादिस्थले
ऽपि न च वेदवक्तृपुरुषव्यापारस्य वेदप्रयोगरूपस्य ज्ञानादेव राजाज्ञादिज्ञानादेरिव वैदिककर्मणि प्र
वृत्तिरस्तु किमर्थमभिधारूपशब्दव्यापार इति वाच्यं वेदस्यापौरुषेयत्वे ज्ञानरूपायामपि तस्य अनुपपत्तेरि
ति भावः भावनाया आख्यातसामान्यार्थत्वेऽपि न शब्दभावनारूपाया अभिधायाः असाधारणलि
ङाद्यर्थत्वविरोध इत्याह द्विविधेति न यावत् प्रवृत्तिरूपाया अर्थभावनाया एवाख्यातसामान्यार्थत्वा
न्नोक्तविरोध इति भावः न चाख्यातसामान्यस्य भावनात्वेनैकशक्त्यैव निर्वाहे किं शब्दभावनायां श
क्त्यन्तरकल्पनेनेति वाच्यं प्रवर्तकत्वस्य शब्दे प्रामाण्ये प्रवर्तयतीति ज्ञानस्याभिधाविषयकस्य निर्वाहाय
शब्दान्तर्भावेनैवाभिधायां पृथक् शक्तेः पाक्षिक्यत्वात् न च शाब्दबोधे तस्य विशिष्य तया मान
स्याप्रामाणिकतया शब्दभावनात्वेन शक्त्यापि पाठः धर्मिकं प्रवर्तनावत्त्वावगाहिकथितनाकारत्वानं राम २

ननिर्वहतीतिवाच्यंअयमधर्मिकस्यप्रवर्त्तनावलज्ञानस्यैवस्वधर्मिकाम्याधीनप्रवृत्तिमत्ताज्ञानस्यापि
प्रवर्त्तकतयास्वर्गकामःशब्देनप्रवर्त्ततइतिस्याद्बोधस्यप्रवृत्तिनिर्वाहकत्वात्तदाहशब्दबोधानंतरंश
ब्दविशेष्यकस्यापिज्ञानस्यसंभवाद्धिविशिष्यस्वविशेष्यकज्ञानस्यस्वप्रवर्त्तकतयाज्ञानांतरस्वीका
रस्यावश्यकत्वात्एकशब्दस्यापितयोःपरस्परमन्वयस्याव्युत्पन्नतयाऽर्थभावनोपरक्तशब्दभा
वनाज्ञाननिर्वाहार्थमपिशाब्दभावनायामर्थकशक्तेरवश्यकतावाध्यानादृशएवबोधःप्रवर्त्तकइ
त्यैश्यग्नीभविष्यतिभावनायाःद्वैविध्येपिअंशत्रयवत्त्वमुपपादयतिसाचेतिसाऽर्थभावनाशब्दभा
वनायाअंशत्रयवत्तापाअग्रेवक्ष्यमाणातयाभावनासामान्यपरत्वेपौनरुक्त्यापत्तेःअथवाभावनासा
मान्यपरएवतच्छब्दःशाब्दभावनायाअंशत्रयवत्त्वेसंवादंदर्शयितुंतस्यालक्षयालमयेऽनुवदिष्यतिक
र्मभाव्यंतत्रार्थभावनायाःस्वर्गादिरूपफलेशाब्दभावनायास्तुअर्थभावनायत्वाच्याप्रवृत्तिरेवसेये

अभिधा
२
3

यक्षीभविष्यति करणमर्थभावनायां यागादिरेव तत्र च नेधात्वर्थस्य भावनायां करणत्वेनैवान्वयात् अ
त एव यजिश्चेत्यामाख्येयोगे स्वर्गोद्यं फलं भावयेत् स्वर्गकाम इत्याकारकता विध्यर्थे बोधस्य सकलतांत्रि
कानुमतत्वात् ननु स्वर्गादिफलभावकत्वं यागादिद्वारेति चेत् न क्रियानुकूलत्वलाभः इत्युक्तप्रवर्तकज्ञा
नानिर्वाहः स च परंपरया साधनत्वघटकतया शाब्द्यार्थ एव वा धक्कत्तीसा हावपियाकेन विकृतिं भा
वयतीत्याकारकस्यान्वयबोधस्य अतेन ततम्लत ग्रहेति प्रवर्तमानमपारम्भविषयत्वात्॥ यागादेः कृ
तिजन्यस्य कृतावकरणत्वेपि फलोत्पत्त्यनुकूलव्यापारत्वभावनेकदेशे उत्पत्तौ करणत्वमाभावना
करणत्वप्रवादः यागेः स्वर्गं भावयेदित्यादिविध्यर्थे विवरणेपि धात्वर्थस्य भवनएव तत्तीयार्थकरण
त्वान्वयात् शब्दभावनायाः करणं शक्तिग्रह इत्यस्यैस्फुटं इति कर्तव्यता प्रयोजनांशं नवरियारी अर्थभा
वनायाः स्वर्गादिजनने सहकारिणी सा च तत्तद्भावनात्मा मातानपरत्वे शब्दभावनासहकारित्वेन व हिय

रत्न
२

मानमेवाबनाप्युपलक्षणो यानत्वापेक्षत्वं च भावनाया लिङ्बोधकाकांक्षाजनकोपस्थितिविषयत्वं
भावनात्वेन भावनायाः शाब्द्यात्तूपस्थितौ किंभाव्यं केन भाव्यं कथं भाव्यमित्याकांक्षोत्थापनेन तु स्वर्गादि
जनकेन चित्रेनयसहकृतत्वं न तत्सापेक्षत्वं स्वर्गजननीयेन चित्रेन यागेन स्वर्गादिरूपभाव्यं कथं भावयेदि
त्याकांक्षोत्थापनेन तु स्वर्गादिजनकेन चित्रेनयसहकृतत्वेन तत्सापेक्षत्वे स्वर्गजननीयेन चित्रेन यागेन
स्वर्गादिरूपभाव्यस्य सहकारित्वासंभवात् अन्यथा आकांक्षाविरहे स्वर्गादिके स्वर्गादिफलादिकं
आदिपदात्करणसहकारिणः परिग्रहः न भावयेन्नान्वीयात् अथवा न भावयेन्न बोधयेन्न वेदइ
त्यध्याहार्ये उक्तभावनारूपपदार्थकरणसहकारिणः परिग्रहः न भावयेन्नान्वीयात् अथवा न भा
वयेत् न बोधयेन्न वेदइत्यध्याहार्ये उक्तभावनारूपस्य अर्थभावनाशाब्दभावनेति विशेषणद्वयपरेः शब्दी
जं दृश्यतितत्राद्येतितत्र न यागमध्ये आद्याप्रथमा ज्ञाद्यर्थभावना अर्थविषयत्वेन स्वापस्थापकाख्या

अभिधा
५

तस्मभिव्याहृतधात्वर्थयागाद्यनुकूलत्वेन विषयत्वेनेति यथाश्रुतार्थो न साधुः निर्विषयकस्याचेतन
कर्तृव्यापारस्याप्यनुपपत्त्यर्थभावनात्वापत्तेर्न विरोधात् अर्थभावनायाः प्रवृत्तिमात्रार्थकत्वस्य योगा
च्छतीत्यादावव्याप्तेस्तत्रार्थकत्वानुपपत्तेश्च आह फलस्य तदनुकूलेति फलं क्रियासाध्यं व्यापारे सती
त्यपि क्वचित्स्यात् तत्रापि व्यापारः क्रियात्मकः तद्व्यतिरेकेणानुकूलव्यापाररूपकर्तृपरत्वमिति पोषनावच्छेद
कधर्मिमात्रमित्यर्थः मात्रपदं कृतत्वार्थकं कर्तृवाचकत्वेऽपिहार्थमचेतनेस्येव पचतीत्यादौ चैत्रादिः पु
रुषः अचेतनेोरथादिरितिरथो गच्छतीत्यादिवाक्यस्याव्याप्तत्वार्थभावनाबोधकत्वोपपत्तिरिति
भावः तस्मात् अभिधा यत्र विवक्षितविशेषः तथाचरथादिनिष्ठगमनाद्यात्मकक्रियानुकूलत्वेनोरथादिरूप
व्यापारस्यापि कर्तृशक्तितयाऽर्थभावनात्वमक्षतमिति रथो गच्छतीत्यादिवाक्यस्याप्यात्मनस्यार्थे
भावनाबोधकत्वोपपत्तिरिति भावः तस्मात् अभिधारूपा भावना शब्दभावनापरवाच्येति शाब्दभा ५

वनाइतिविग्रहेनहित्वस्यतद्व्यापारत्वस्य संबंधत्वेन षष्ठ्यर्थत्वादिति भावः अर्थभावनाया आख्यात
सामान्यार्थत्वे शाब्दीभावनाया आख्यातविशेषलिङाद्यर्थत्वे भट्टकारिकासंवादमाह तदुक्तमिति अ
भिधाभावनामिति अभिदधातीत्यभिधा शब्दस्तद्भावनामित्यर्थः अभिधामित्यस्य समस्तपादेऽभिधान
मीमित्यर्थः लिङादयः आहुः ब्रुवते शक्तिरन्यमुखो यः अमुमर्थभावनांशं एते नाख्यातसामान्यार्थ
त्वविरहः स्पष्टीकृतः अन्याऽभिधानो मा योगाचरीत्यर्थः अर्थात्मेत्यत्रात्मपदस्य स्वरूपार्थकत्वेन संभवति
अर्थपदस्य धात्वर्थपरत्वात्तत्कूलव्यापाररूपभावनायास्तद्रूपात्मकत्वाद्धेतो व्याचष्टे अर्थात्मे
त्वमिति अर्थगोचरत्वं अर्थानुकूलत्वं तदुक्तं शब्दप्रवृत्तीति इत्याकाङ्क्षोत्थापकमेकरणनिवो
ह्कार्यं शब्दप्रवृत्तीत्यर्थः लिङोऽभिधेयस्य प्रवृत्त्यर्थे निरूपितत्वान्व्यापारत्वविशिष्टबोधकप
दस्य तन्मात्रचेष्टा लिङ् इति लिङः निष्ठेव शब्दाभ्युपयत्नापि पिहरणं कथमभ्युपेयमस्मारांकोक्षायां

अ॰ भि॰
५
5

स्वयमभिधासाधकव्याप्तिग्रहणेनाय शाब्दबोधादिहेतुव्यापारमाहाथ घटिदसाधनतारणा यत्स्यानिष्टव्यापा
रजनकत्वस्य व्याप्तिर्दर्शनीयात न्वस्यनिष्टत्वगर्भमतित्वायामेव संगच्छत इति लिङो हिं वृक्ष्यमाणत्वाद्दश
ग्रतिशैवमयोक्त इति लाभाय लिङ् निष्टत्वके व्याप्तिर्दर्शयति करणस्येतिहेष्टमिति तथा च यत्स्वाभि
न्नसमवेत यत्कार्यं प्रतिकरणतत्कार्यानुकूलस्वनिष्टव्यापारजनकमिति यामे लिङ् निष्टस्याप्यभि
धारूपव्यापारस्यावश्यकत्वमिति भावः दृष्टान्ते रितिरण्डस्य चक्रनिष्टभ्रमिजनकत्वे कोष्टस्यतन्तुले
वयवनिष्टसंयोगविशेषरूपविकृतिजनकत्वमिति प्राक्संख्यानयोर्द्रष्टव्यः स्वं दण्डचक्रयोरदृष्टेनो
धानुकूलक्रियाज्वलनो वह्निः ननु करणत्वे फलायोगव्यवच्छिन्नकारणत्वं तच्चाभिधारूपव्यापारे
स्तीति तत्र ग्रहस्य दिकार्यानुकूलव्यापारानभ्युपगमे व्यभिचारः तदभ्युपगमे धानवस्थ्यादसांप्र
कांनिराकुर्वन्नेवेति ननु व्यापारत्वस्य गर्भकारणत्वस्य हेतुत्वे प्रिडंडसंहारोदेभ्रमानुकूलनोदनास्ति एम
२

पव्यापारवत्त्वव्यभिचारोऽनुगीरश्चेदस्यमनव्याहव्यापारभिन्नकरणमेतावत्त्वेनैन तत्कार्यानुकूलव्यापारभिन्नव
त्करणत्वरूपकरणत्वस्यैवप्रकृते हेतूकर्तुं प्रतावत्वात्स्यर्थः तस्यैवमेवव्यभिचारानवस्थावारणार्थमेव
व्यभिचारानवस्थयोरिति अभिधारूपकार्यस्य व्यापारभिन्नकरणे शक्तिज्ञाने तदनुकूलव्यापारान्तरा
नुपगमे व्यभिचारस्यावश्यंप्रगमे वानवस्थापाताः अस्मे यादृशमर्थः शक्तिज्ञानमिति पदार्थस्मरणादौ स
र्थैः शक्तिज्ञाने शाब्दस्याजनकत्वात् यायथाप्सुतां ननु किमित्याकांक्षायामिति तत्र काचित्काश्चि
मभिधायाभाववत्तान्तोक्तेः किमित्याकांक्षोदयात्पुरुषप्रवृत्तिरिवभावेऽसत्त्वमित्यर्थः संवंधे तौ तत्र
तत्रेति पदानुषंगो बोध्यः केनेत्याकांक्षायामिति भाववत्त्वे कथितेनभाव्याकांक्षा पारेव कीदृशकर
णमहकारणभाव्यमिति करणाकांक्षायामस्य स्यात्संबंधे साधुक्तमित्यर्थः अहसि भवनेश
क्तिरूपसंवंधग्रहस्य कारणत्वेनावश्यापत्ति अनुपसन्नत्वेति अभिधाद्वावग्रहौ । वृत्तिपिटआदिषु

अ॰भि॰
६
6

रुशक्तिकस्येत्यर्थः लिङ्ग्रहान् लिङ्ग्युरुनिष्ठाभिधानतः न शक्तिग्रहः अभिधायां लिङादिपदशक्तिग्र
हः सहकारी अभिधाविषयकप्रवर्तकज्ञानद्वारा प्रवृत्तिजनने केकरणाविधया प्रवृत्तिभावनात्वेन वी
हकइत्यर्थः विधिर्मां यागे प्रवर्त्तयतीति ज्ञानेऽपि वृद्धानामस्त्येव यागे प्रवृत्तिं भावयितुं कथमभिधा प्र
भवतीत्याकांक्षायामभिहितं प्ररोचनेनाहिकारिकाप्रतीकं व्याचष्टे प्ररोचनेत्यादि प्ररोचनावाशुर्वैक्षे
पिष्टादेवतेत्यादि क्रतस्येवाह अवसीदद्धिर्निमग्नवसीदद्भ्यः बलवद्दुःखदर्शनप्रवृत्तिजनने कुंठीभवं
त्याः विधिशक्तेरुत्तंभकतयाद्दुःखविघटनेनोपकारकतयाऽप्ययोगिनीति प्रवृत्ताविन्यादि कस्यार्थवा
दस्य दुःखविघटकतया प्रवृत्त्युपधायकत्वेऽपि किमाह प्रशस्तत्वज्ञानेनेति इष्टफलजनकत्वादिज्ञा
नेनेत्यर्थः प्रवृत्तेरिति अनुभवसिद्धत्वादिति शेषः स्मृतिः न तज्ज्ञानजनकापीत्याह उज्जिका
शक्तिशक्तेः कुंठतापनायिका भवतीति अनुभवानुरोधेन प्रशस्तत्वज्ञानस्य दुःखविरोधित्वोपगमा

राम
६

रिति भावः न चेष्टसाधनताविधिपक्षे विश्वजिताप्येतेन स्वर्गादेः फलकामबोधकपदाश्रवणस्थले विधि
नः सामान्यत इष्टोपस्थितावनद्विशेषाकांक्षायां स्वर्गादिरूपफलविशेषबोधस्यावश्यकतया नद
नुपपत्तानरभिप्रायस्यैवाकल्पनमुपपद्यते अभिधाया विध्यर्थत्वे च तत्कल्पकविरहः साधकाभि
धारूपभावनायाः यागादिरूपक्रियायां गोचरस्य प्रवर्त्तनात्वज्ञानस्य प्रवर्त्तकतया तस्याभाव्यतयाऽभि
धायां प्रवृत्त्यन्वयेनैव निर्वाहात् तादृशान्वयानिर्वाहकभाव्याकांक्षासंपत्तये शब्दनिष्ठभावनात्वेन
वाभिधायां लिङादेः शक्तिरेवेत्यनेन रूपेणैतत्तत्त्वेनोपस्थितौ च तत्र ग्रहस्यान्वयात्स्वहेति भावनात्व
रूपप्रवर्त्तनात्वलाभः । अन्वयबलात्प्रवर्त्तनात्वबोधे वाभिधायां प्रवर्त्तनात्वान्वयप्रयोजकस्य प्रवृ
त्तेः स्वफलत्वस्य ज्ञाने योग्यताज्ञानविधयोपयुज्यते तादृशी च योग्यता नियमतोऽन्वयितावच्छेदकत
याप्रकृमते भाष्येते घटेन जलमाहरेत्यादौ छिद्रेतरत्ववतः शाब्दजन्मबोधेनप्रमाणे पदात्तदुपस्थितस्या

अभि॰ ८

भावात् नासर्पविषयत्वेनोऽत्रानुपपत्त्या योग्यतोपस्थापकपरकल्पनापा आवश्यकत्वं अत एव दिवा
भोजी देवदत्तः पीन इत्यादौ श्रुतार्थानुपपत्त्या रात्रिभोजीत्यादिपदं कल्प्यत इति नैयां सिद्धान्तः इदं च
विश्वजिता यजेतेत्यादावपि फलकामत्वबोधकपदकल्पनं अन्यथानुपपत्त्यैवेत्याह इदं चात्रेत्यादिनाश्र
तिप्रसंगादिति अभिधादिपदबोधीनाभिधाज्ञानान् लिङादिपदैः असत्त्वमापित्वानिष्टसाधनत्वस
दभिधानाद्वाप्रवृत्तिप्रसंगात् प्रवर्त्तनात्वेन तत्क्रियायोगेऽवश्यं इष्टसाधनत्वेन ज्ञाते निराकृत्य
धर्मेशेत्यादिः निष्फले निष्फलत्वेन ज्ञायमाने दुःखे कण्टकत्वेन ज्ञायमाने कर्मणि तत्क्रियायो
ग्यत्वस्य ज्ञानाद्दर्शनप्रयत्नेऽप्रतीतिः यथा इष्टसाधनत्वेन ज्ञातुं शक्यत इति अत्रैव नवेससयोगः स
फलत्वरूपान्वयप्रयोजकरूपज्ञानविरहादिति भावः भावनात्वेन फलोद्देश्यसाधनत्वेन ज्ञातायाश्च
अभावानां नांप्रसेवेति शेषः तथा चात्वेशकानत्वसनुपपन्नेन फलभावनात्वेन ज्ञानाभिधावि राम

प्रवृत्तिहेतुरित्यनुषंगेनान्वयश्चेत्यपास्तं व्याख्यानं न सम्यक् फलभावनात्वेनाभिधाज्ञानस्य प्रवृत्तिकत्वे
प्रमाकरणतात् उक्तायाः प्रवृत्तेः सफलत्वाज्ज्ञानेऽभिधायाः प्रवर्त्तनात्वेन ज्ञानाशक्तताप्यसत्त्वाहेतुत्वात्
फलभावनात्वज्ञानस्य प्रवर्त्तनात्वज्ञाननिर्वाहकत्वेऽप्येवमादृश्ययुक्तिसंगमेनाप्यभिधायाः फलभाव
नात्वबोधस्यैव प्रवर्त्तनात्वज्ञाने योग्यताज्ञानविषयाहेतुत्वमेतद्दूषयेनोक्तमित्यपि निरस्तं अभिधाया
ः स्वर्गादिफलभावनात्वेन ज्ञानस्य प्रवर्त्तनात्वबोधोपयोगितयास्वीकारे भाष्याकांक्षानिवृत्तेः
पुरुषप्रवृत्तेर्भीमत्वेनान्वयानिर्वाहात् प्रवर्त्तनात्वज्ञानस्यैवानुपपत्तेः प्रवृत्तिद्वारैवाभिधायाः फ
लभावनात्वेन न तत्फलभावनात्वग्रहे प्रवर्त्तनात्वज्ञानस्य योग्यताज्ञानविषयापेक्षणीयतापत्तेरन्यो
न्याश्रयप्रसंगात् अभिधायाः फलभावनात्वज्ञानस्य प्रवर्त्तनात्वज्ञानोपयोगितया विवक्षित
त्वेऽभिधायानिष्फलत्वज्ञानस्यैव प्रवर्त्तनात्वबोधविरोधित्वकथनौचित्यात् निष्फलात् दुःखैकफला

८

वासेत्यनभिधायनिःफलेडुःखैकफले वाकर्मणीसाध्याभिधानस्यासंगतिप्रसंगाच्च एवं च क्रियाग
तमिष्टसाधनत्वं न विध्यर्थः अपि त्वभिधागतमित्यग्रिमग्रन्थेऽभिधापदं अभिधान्वपर्थभावना
परमिति ध्येयं भाव्यानुपस्थितौ भाव्यफलाभावेन तत्संभवः फलभावनात्वज्ञानसंभवः ननु यागादि
क्रियाभावनात्वमेव योग्यतास्तु किं विघ्नजितेत्यादौ फलबोधकपदकल्पनेनेत्यत आह नचेति
क्रियाभाव्याभाव्यत्वेनार्थभावनात्वेऽपि नीसहनी योग्यताज्ञाननिर्वाहिका कष्टत्वात्स्वतो पुरुषा
र्थत्वान्न तथा च यागादिभावनात्वमात्रं प्रवृत्तिजनकाभिधाभाव्यत्वनिर्वाहकं किं तु स्वर्गीमारकपाना
दिभावनात्वमेव तज्ज्ञानार्थं समपि स्वर्गादिफलोपस्थितेरावश्यकत्वेन स्वर्गादिभावनात्वमेव प्रवृत्ता
वभिधान्वयप्रयोजकमस्तु इति भावः समभिव्याहृतफलं समभिव्याहृतपदोपस्थाप्यस्वर्गादि
कं तान्ता अर्थभावनाप्रवर्त्तनात्वज्ञानोपयोगिनीति शेषः अतएवार्थभावनायाः स्वर्गादिभावना एम

८

त्वज्ञानानुरोधादेव फलं फलं फलबोधकपदं नेत्येतन्मतेऽपि विधिवाक्यादिष्टस्वर्गादिसाधनताबोधेऽस्मा
यमताविशेषः स्यादित्याशंक्य समाधत्ते यद्यपीत्यादिना सेयं विधिनिष्ठत्वेनाभ्युपगतनाभिधा इष्टसाधन
त्वबोधनिर्वाहस्य प्रवर्तनेनालब्धोऽपि यजिकीरिति विशेषः इत्युपलक्षणं तेन तन्मते इष्टसाधनत्वे विधिशक्ति
रपि तु भावनायां लेनाप स्थितायां भावनायां स्वर्गादिपदोपस्थाप्यस्वर्गादेरिष्टत्वस्य ज्ञप्तिवैचित्र्येण भाव
नयान्वयादेवेष्टसाधनताबोधः तदुक्तं दोषोऽपि योग्यताज्ञाननिर्वाह्य न नु प्रवृत्तित्वं स्यात् न्यायमते तु सर्व
त्रैवेष्टसाधनताज्ञानस्य प्रवर्तकत्वेनापाद्य इष्टसाधनत्वेन लिङादेः शक्तिरस्त्यपि विशेषोऽबोध्यः नित्य
संध्यावंदनादि विधौ नित्यत्वेन तस्य वा यजनकीभूताभावप्रतियोगित्वेन नित्यगोचरत्वं वा तत्कृतेरभिधा
भावत्वेनान्वययोग्यत्वं इत्यवधेयं तदेव कृतेरिष्टसाधनत्वमेव किंपाक तन्मिष्टसाधनत्वं विनानेसा
क्षिप्तस्यानुपपत्तिप्रमाणेन लभ्यस्य तदिष्टसाधनत्वस्य बोधोऽपि भवत्वेतु मतमिति शेषः प्रवर्तनेनालस्या

अ॰भि॰
९

१ नानुकूलालिङः प्रवृत्तित्वावच्छिन्ने ष्टथक् शक्तिर्न तु प्रवर्तनात्वेनाभिधायां शक्तिर्भावनायां भाव्यत्वेन प्र
वृत्तेरन्वयादेवं प्रवृत्तिभावनात्वरूपप्रवर्तनात्वलाभेनेन रूपेण शक्तौ मानाभावात् शक्तौ वा प्रवृत्तिभावना
त्वरूपप्रवर्तनात्वलाभे भाव्याकांक्षानुपपत्त्या हि तन्मते चैतन्यव्यापारसाधारणस्य भावनात्वस्यैवाख्या
तसामान्यशक्यतावच्छेदकत्वात्तस्मात् सामान्यशक्तितः प्रवर्तनात्वबोधोपपत्तिकः प्रवृत्तित्वावच्छिन्नलाभः
इत्यनन्यलभ्यतया विधिप्रत्ययस्य प्रवृत्तित्वावच्छिन्ने शक्तं नन्वेवमाख्यातसामान्यवाच्यभावनायां प्रवृ
त्तित्वावच्छिन्नस्याभेदान्वयः सामान्यविशेषशक्तिभ्यां प्रवृत्तित्वभावनात्वाभ्यां भावनायामेकत्र द्व
यमितिरीत्या सकृदेव वा बोधः भावनात्वज्ञाने तिङ्भावनात्वज्ञानेऽस्पर्शः तदनुकूलाचर्तनेव वृ
चैतन्यशक्तिः प्रवृत्त्यनुकूलाश्रयस्य प्रवर्तकत्वनिर्वाहिकाभिधारूपा तन्मते कार्यानुकूलशक्तिनिय
तत्वात्कारणतायाः अपराबुद्ध्या नानुकूला इति शाब्दभावनात्वेनाभिधात्वमनुकूलाएका प्रवृत्ति राम ९

त्वेन नरत्वेबोधको अपरभावना तेनार्थभावनाबोधिका आख्यातसामान्यस्यापरसञ्ज्ञा क्रियात्रितयवृत्तिरूपा
त्मिकाः शाब्दी कृत्यर्थः एवं च स्वर्गकामो यजेतेत्यादौ शाब्दीनिष्ठभावनाभाव्ययागकरणकस्वर्गानु
कूलयत्नानुनिरूपभावनावान् स्वर्गकाम इत्याकारकान्वयबोधः शाब्दविशेष्यको विपरीतबोधश्चाख्या
तस्य अभिधारूपभावनायां ह्युत्पत्तिक शक्तिः संभवत्यपि हेयः अथ मां तत्पदार्थस्य विशेष्यत्वात् तत्र स
स्मिन्नपेय यथा या एवानुपपत्तेः इति विशेषणं तथा कर्त्तुर्विवक्षितत्वेन नीयाया एव साधुत्वात्
क्रियायाः फलभवनेकरणतयान्वयस्य केन भाव्यमित्याकाङ्क्षानिवृत्त्यनुरोधात् तत्कारयितृक्रि
याहो रेव हि तेः स्वर्गाद्युत्पादकत्वज्ञानं तद्गतमेव क्रियानुकूलत्वमानं तु उत्तरकालीनं चेति दृष्टि
तप्रवर्त्तकधीनिर्वाहः अर्थभावनोपकारकत्वमयाजादेः शाब्दभावनोपकारकत्वमेवं च नायाः न तत्क
रणाशक्तिग्रहस्य च न प्राग्बोधे मानं न तदुपस्थापकसाकाङ्क्षपदाभावात् किं नु तत्रकालं कथंचि

मानमिति सामान्यतः संकेतभिन्ना या मितिः शब्दस्य पादिभ्रवर्त्तैकाभिधात्वेपदार्थो नरवलाउपगमे शब्दोयाग
मभिदधानोऽत्र कोभिधापदार्थ इत्याकांक्षानिवृत्त्यर्थं संकेतभिन्नत्वमुक्तं तथा च संकेत एव तत्राभिधा
पदार्थः अप्रवर्त्तकशब्देपि अर्थाभिधानत्वकृ,वहाएतत्क्वचधातुसमानार्थकस्याभिदधातेः संकेतरूपत्व
निर्वाधकतायाः हृदमत्वादितिभावः उक्तानुमानेप्रमाणे इत्याशंक्यानन्यासिद्धिमाह शब्दस्येति यत्सह
राधीनव्युत्पत्तिबलेनेति व्युत्पादकस्य व्यवहारदर्शनेनेत्यर्थः ज्ञानमात्रेति मात्रपदं लभ्यं प्रवृत्तिजनकत्वा
वधारणव्यवच्छेद्यं दर्शयति नत्विति स्वप्रवृत्तौ ज्ञानस्य हेतुत्वावधारणात् इयं प्रवृत्तिर्ज्ञानजन्या प्रवृत्तित्वा
त्मत्प्रवृत्तिवदित्यनुमानेन ज्ञाते प्रवृत्तिजनकत्वेन कल्पयितात्तद्धेतुतया गमस्याप्रमाणत्वाबाधेन उपस्थि
तत्वाद्भ्रष्टे वावधारणात् प्रवृत्तौ चात्र कूप्तहेतुताकज्ञानेनान्यथासिद्धत्वाच्छब्दस्य कारणत्वावधार
णासंभवादितिभावः अभ्युपेत्याहभावे वेति शब्दप्रवृत्तिजनकत्वस्याभिलेपस्यार्थः आवश्यकत्वेति श राम
१०

ह्यायत्तधीनत्वप्रसिद्धिस्थलेलाघवान्नप्रवृत्तिसामग्र्यामावश्यकत्वस्यकारणतावच्छेदकस्यार्थः एतज्ज्ञानादिस्थलेपिराजनि
ग्रहस्यानिष्टनिवृत्तिहेतुषुसाधनताज्ञानस्यैवसंभवादितिभावः अभिधात्वस्यव्यापारत्वेपिस्मरणादिनिव
याज्ञसाक्षादिष्टसाधनत्वनिष्टसाधनताव्यापाराधीनत्वनियमात्साभिधासिद्धिरितिभावः तथापिस्वनिष्टव्याप
रजनकत्वस्याधात्वोक्तनियमादभिधासिद्धिर्निःप्रत्यूहैवेत्याशंक्यनाहृशनियमंदूषयतितच्चेतितथाअभि
धासिद्धिः अप्रयोजकत्वतयाव्यापकतावच्छेदकाघटकेनतयाऽर्थविशेषणत्वात् विशेषणत्वेपूर्व्वेनिवं
धनासिद्धेः व्यापकेत्यर्थविशेषणतायाअशेषत्वमाशंक्याह व्यापीतिअनुमितिकरणत्वानतरेतुकृ
त्यव्यापारश्रयत्वविरहान्नेतिशेषः तदिदमुक्तमितिक्रियेष्टसाधनतायाः प्रवर्त्तकत्वस्यावश्यकत्वमेवो
क्तमित्यर्थः एवंचासत्यपीत्यादिमूलस्याभिधाज्ञानाभावेपिइष्टसाधनतादिज्ञानात्प्रवृत्तेः इत्युक्तेन्तता
या आवश्यकत्वान्नतएवसर्वत्रप्रवृत्तिनिर्वाहादभिधादिज्ञानहेतुत्वेमानाभावादित्यर्थः प्रवृत्तिसा

मानेव्यभिचारेपि महानसविशेषे हेतुत्वसंभवात् व्यतिरेकव्यभिचारेणाहेतुत्वं नोक्तं तेन परतोपयादौ लक्षणस्यासंभ
वात् यद्यपि शब्दसमवेतशब्दघ्वंसे रूपाभिधाज्ञानाभावेपि प्रवृत्तिरिति यथाश्रुतमूलार्थः प्रसिद्धिरूद्दूष
णाप्रसक्तस्तथापि शब्दे समवेतज्ञानस्य शब्दव्यापारज्ञानस्य वा ऽभावे सत्यपीत्यर्थः तस्मिन्निष्पादिहेतुत्वभिधा
ज्ञानस्याप्रवर्तकत्वेन संगच्छते नैनाप्यापि कारीनामभिधानमुपगमात् तज्ज्ञानस्य घटितहेतोरप्रसिद्धे
रित्यये वक्ष्यमाणतया संकल्पात्पूर्वोदितानां प्रवर्तकत्वेनाहशाहेतुदृष्टं दर्शयति तस्मिन्निति उक्तसाध्ये
षु अभिधाज्ञानादिरूपकथितपक्षान्वितसाध्येषु मध्ये साध्यस्य सर्वत्रैकोपि विशिष्टस्य नानात्वान् वक्तृ
वनं यथायोग्यमिति यत्र यस्य संगतिस्तत्रैव प्रवर्तकहेतोरत्वयात् ननु सर्वत्रैव हेतुद्वयस्येत्यर्थः नवाभि
धाज्ञाने सत्यपीति हेतुर्यथा शब्दनिष्ठत्वशब्दव्यापारत्वरूपाभिधात्वघटकदलद्वयं विशकलितमु
पादाय पर्यायत्वानन्तत्वात् तस्मिन्निसादिहेतुरपि शब्दनिष्ठविषयकशब्दव्यापारविषयकज्ञानसत्ते राम ११

पीतिव्याख्याने शक्यत्वेनादृष्टस्य शब्दस्य लभ्याद्दोषादिविषयकज्ञानस्य प्रसक्तिरिति कथमभिधायत्नेऽनादृ
शाहेतुपरित्याग इति वाच्यं नादृष्टज्ञानस्यैकदापि चिरप्रवृत्तावपि शब्दनिष्ठव्यापारविषयकत्वेन हेतुत्वे नहेतु
तायामनुपपत्त्यभिचारविरहेणानादृष्टहेतुतायाः हेतुतत्त्वस्य निराकरणायोगात् इदं लक्षणं चेयं। यद्यपि संकल्पा
दिज्ञानेन प्रवृत्तिर्योग्यप्रवृत्त्यनुपधायकत्वादिति यावत् ज्ञानानुमानेनाभावासिद्धिः संकल्पादिज्ञानत्वेन प्र
वृत्तियोग्यतावच्छेदकं प्रवृत्त्यनुपधायकत्वमिति लादिसत्त्वमात्रासिद्धिर्विरहेपि व्यभिचारः स्फुट एव तथापि
संकल्पादिज्ञानत्वेन प्रवृत्तिजनकतावच्छेदकं न तत्तेमानाभावान्न इत्तानुमानेमेवाज्ञामिहितं श्रद्धयपत्रक्रिया
ज्ञानमात्रेण न तु संकल्पादिज्ञानेन तत्र प्रवृत्त्यभावः संकल्पादिज्ञानाभावादिति संकल्पादिज्ञानत्वस्य प्रवृत्ति
जनकतावच्छेदकत्वे प्रामाणिकं इत्यसिद्धिः। शंकापामुक्तं न स्मिन्नर्थस्य प्रवृत्तेरिति इष्टसाधनत्वादिज्ञानेऽस
ति संकल्पादिज्ञानेऽसत्यपि प्रवृत्तेरिष्टसाधनत्वादिज्ञानादिविरहे एवावश्यकत्वात् प्रवृत्त्यभावप्रयोज

अ·भि·
१२
12

कोनन्तुसंकल्पाद्धिज्ञानाभाव इतिदर्शितयुक्तिविरहानुमानाभावरूपहेत्वसिद्धिरितिभावः भट्टेनसमंविवादेश
ब्दसमवेतविषयकत्वेनशब्दव्यापारविषयकत्वेनवाघटितोनाम्नोनप्रवर्त्तकतावच्छेदकः नत्वेमानाभावान्
इष्टमनुमेयं क्रियाज्ञानमात्र इष्टशाब्दामप्रवृत्तौ नतुधर्मावच्छिन्नाभाव एवप्रयोजक इतिमानस्त्वात्तुसिद्धिरि
त्याशंकापरिहाराय ओक्तमसस्पीतिकथावनतद्रूपावच्छिन्नाभावो नकार्याभावे इष्टसाधनताविज्ञानाभावा
सहितः प्रयोजकः शाब्दाद्यधीनप्रवृत्तिस्थले न इष्टभावसत्वेनाप्यप्रवृत्त्यापत्तेरित्यावश्यके इष्टसाधनत्वादि
ज्ञानाभाव एवप्रयोजकः इतिनोक्तमानावकाश इत्यभिप्रायः कस्मात्पूर्वोक्तानामप्रवर्त्तकत्वपक्षेप्यस
पीलादिहेतुः संगच्छतेभावनाख्यानाहेतुत्वेन पूर्वोक्त एवहेतुः क्लृप्तिसाम्यमनाज्ञानसत्वेक्लृप्तिरूपभावनाख्या
नस्यावश्यकत्वादस्मसपीतिहेत्वसंगतेरिति पर्यायेणाभिसंबंधिहितवनोभिश्रस्याशयः प्रवृत्तिदर्शे
नेनविधिशब्दश्रवणे प्रवृत्तिप्रयोजकत्वावधारणेन व्यक्तिकल्पनीयेनेनान्वयः शक्तिमित्यसन राम
१२

चेतदुपपादकं विधिविषयस्येष्टत्वादेः तादृशीच प्रवर्त्तिकानेन मूलकेन एतन्मपीछाया लिङः शङ्कावपित्ता
नमात्रं जन्येति शक्तेर्ज्ञानोपायत्वादिति भावः नचतन्न प्रवर्त्तकमिति स्वरूपसत्या एव छायाः स्वप्रवृत्ति
हेतुतेनावधारणादिति भावः एवं चेच्छायां न लिङादिशक्तिकल्पनं संभवः नच्छन्नेः स्वरूपसदिच्छा
रूपप्रवृत्त्युपायानुपपादकत्वात् कथं सा लिङर्थः स्वर्गकामित्याशयः स्वर्गकामेति इष्टमापानतः स्वर्गका
मपदस्याकमधानेर्विध्यर्थकत्वेपि ततः क्रियायामिच्छाविषयलाभतोतेः प्रवर्त्तकत्वमनीतिनिर्वोढ्य
यकामनायां विधिशक्तिकल्पनं संभवात् तन्निच्छाशक्तिरिच्छामेव स्वरूपसतीमुपपादयति अनर्हछायां
लिङ्वाच्यत्वं दुर्वारमेवेति भ्रमं निराकरोति नचेति बाधादिति वाचकेवाच्यजनकताविरहस्य सर्वसंम
तत्वानेतदेष्यादिमूलस्य संकल्पे ज्ञानप्रवर्त्तकतामानिराकृतत्वात् स्वरूपसदिच्छायाः प्रवर्त्तकत्वम
पिनास्यवादिनोमतमित्यपिबोध्यं वैदिकेवेदबोधितयागादौ ज्ञानस्यैवजनकतयाक्रियाज्ञानस्ये

अभि०
१३
13

वाच्यत्वव्याघातान्न इति अपूर्वत्वेन विधिग्रन्थपदशक्तिग्रहस्य विधिजन्यबोधात्पूर्वं सत्त्वे कारेनापूर्वबोधात्प्राग
नुपस्थितत्वरूपापूर्वत्वस्यानुपपत्तेरित्यर्थः शाब्दबोधात्पूर्वमपूर्वमानाभावेन शक्तिग्रहानुपपत्तिरपि द्रष्टव्या
अपूर्वपदान्न अपूर्वजनको याग इत्यादिः शाब्दासम्बन्धस्यापत्तेरिति अनुभवविरोधेनेष्टापत्त्ययोगो बोध्यः न स्या
न्नमितिक्रियाविषयकत्वेनेत्यादिः सर्वाख्यातसाधारणत्वात् भावनाया आख्यातसामान्यवाच्यत्वान्ल
ङ्लिङः अपूर्वत्वापत्तेः साधारण्ये लिङ्धर्मत्वाभावेन विशिष्टत्वानुपपत्त्या च नोचितमिति सर्वत्र न हेतुदृष्टा
न्वय इति यदुक्तं तद्बीजं स्वयमेवाह हेतुदृष्टेत्यादिना ॥ इत्यभिधारहस्यं ॥ ॥ श्रीगणेशाय नमः

राम
१३